# SAMPLE PAPER
## Common Annual School Examination-2019

Class-VII (NISHTHA) Subject- Sanskrit

Time- 2.30 Hrs. M.M.- 50

| Q. No | Description | M.M |
|---|---|---|
| | सामान्य-निर्देशा:<br>1. प्रश्नपत्रे चत्वार: खण्डा: सन्ति।<br>खण्ड- 'क' अपठित-अवबोधनम् 10 अङ्का:<br>खण्ड- 'ख' रचनात्मक-कार्यम् 08 अङ्का:<br>खण्ड- 'ग' अनुप्रयुक्त-व्याकरणम् 12 अङ्का:<br>खण्ड- 'घ' पठित-अवबोधनम् 20 अङ्का:<br>2. सर्वे प्रश्ना: अनिवार्या: सन्ति।<br>3. उत्तराणि संस्कृतेन एव लेखनीयानि।<br>4. प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।<br>5. प्रश्न-संख्या अवश्यमेव लेखनीया।<br>खण्ड:- 'क'<br>अपठित-अवबोधनम् (10 अङ्का:) | |
| 1. | **अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत-**<br>समय: मूल्यवान् भवति। अन्यानि नष्टवस्तूनि पुन: लभ्यन्ते किन्तु व्यतीत: समय: पुन: कदापि न आगच्छति। अत: समयस्य समुचित: उपयोग: करणीय:। समयस्य सदुपयोग: मानवस्य लाभाय भवति। विनष्टा विद्या पुन: अभ्यासेन प्राप्यते , विनष्टं धनं पुन: उपार्जनेन आगच्छति, विनष्टयश: पुन: सत्कर्मणा उपार्जयितुं शक्यते परं विनष्ट: समय: बहु अपि प्रयत्नै: दुर्लभ: एव। अतएव अस्माकं जीवने समयस्य सर्वाधिकं महत्वं वर्तते। छात्रै: समयस्य विषये विशेषरूपेण ध्यानं देयम्। | |
| | I.एकपदेन उत्तरत-<br>i. क: मूल्यवान् भवति ?<br>ii. क: पुन: कदापि न आगच्छति ? | 1 x2=2 |
| | II. पूर्णवाक्येन उत्तरत-<br>i. अस्माकं जीवने कस्य सर्वाधिकं महत्वं वर्तते ?<br>ii. छात्रै: कुत्र विशेषरूपेण ध्यानं देयम् ? | 2 x2=4 |

III. यथानिर्देशम् उत्तरत- 1 x4=4

i. **दुरूपयोग: इति** पदस्य विलोमपदं गद्यांशे किं प्रयुक्तम् ?

ii. **‘ अस्माकं जीवने समयस्य सर्वाधिकं महत्वं वर्तते ’** अस्मिन् वाक्ये क्रियापदं किम् ?

(क) **जीवने** (ख) **महत्वं** (ग) **सर्वाधिकं** (घ) वर्तते

iii. **‘लाभाय’** अत्र रेखांकितपदे का विभक्तिः वर्तते ?

(क) पञ्चमी (ख) षष्ठी (ग) चतुर्थी (घ) तृतीया

iv. ‘व्यतीतः समयः पुनः कदापि न आगच्छति ’ अत्र कर्तृपदं किम् ?

(क) समयः (ख) व्यतीतः (ग) कदापि (घ) एतेषु किमपि न

**खण्ड- ‘ख’ रचनात्मक-कार्यम् (8 अङ्काः)**

2. चित्रं दृष्ट्वा मंजूषातः पदानि चित्वा वाक्यानि पूरयित्वा पुनः लिखत- 1 x4=4



मञ्जूषा-

| |
|---|
| क्रीडाक्षेत्रम् , द्वौ , दोलायाम् , बालकः , |

i. इदम् एकं .............. अस्ति।

ii. क्रीडाक्षेत्रे...............बालिका च ‘बैडमिन्टन’ इति क्रीडतः।

iii. क्रीडाक्षेत्रे .........वृक्षौ स्तः।

iv. एका बालिका ................ दोलयति।

| | | |
|---|---|---|
| | अथवा (**केवलं नेत्रहीनछात्राणां कृते**)<br>मंजूषातः पदानि चित्वा 'पुष्पवाटिका' इति विषयम् अधिकृत्य चत्वारि वाक्यानि पूरयित्वा पुनः लिखत-<br>मंजूषा-<br>पुष्पाणि, मनोहरा , पुष्पवाटिका, बालकाः<br>i. विद्यालये एका ............ अस्ति।<br>ii. पुष्पवाटिकायां अनेकविधानि .............. विकसन्ति।<br>iii. पुष्पवाटिकायां ................ क्रीडन्ति।<br>iv. पुष्पवाटिका ............. अस्ति। | |
| 3. | **मंजूषायां प्रदत्तानां उचित-कर्तृ- क्रियापदानि मेलयित्वा वाक्यनिर्माणं कुरुत -** | 1x4=4 |

| A(कर्ता) | B(क्रिया) |
|---|---|
| त्वम् | पठामः |
| सा | पठामि |
| अहम् | पठति |
| वयम् | पठसि |

| | | |
|---|---|---|
| | खण्डः– 'ग'(अनुप्रयुक्त–व्याकरणम्) | |
| 4. | **कोष्ठकप्रदत्ते शब्दे सप्तमीविभक्तिं योजयित्वा रिक्तस्थानानि पूरयत-**<br>i.छात्राः ............. पठन्ति। (विद्यालय)<br>ii. मोहनः ................ क्रीडति । (क्रीडाक्षेत्र)<br>iii. बालिका .............. खादति। (गृह)<br>iv. ज्ञानं........... अस्ति। (पुस्तक) | 1 x4=4 |
| 5. | **अधः वाक्येषु रेखांकितक्रियापदस्थाने मंजूषातः चित्वा भविष्यतकालस्य क्रियापदानि लिखत -** | 1 x4=4 |

पठिष्यामि ,भविष्यति , करिष्यति , लेखिष्यामः

i. अहम् पुस्तकं पठामि ।

ii. वयम् कलमेन लिखामः।

iii. अस्माकं विद्यालये अस्ति।

iv. रामः स्नानं करोति।

6. **कोष्ठकप्रदत्तशब्देषु लिङ्गवचनानुसारम् उचितविभक्तिं योजयित्वा रिक्तस्थानानि पूरयत-** 1 x4=4

i.सीता ............ पुत्री आसीत् । (जनक-षष्ठी एकवचन)

ii. रावणः .............भ्राता आसीत्। (शूर्पणखा- षष्ठी एकवचन)

iii. छात्राः प्रतिदिनं .......... कुर्वन्ति। (क्रीडा-द्वितीया एकवचन)

iv. छात्राः .............विद्यालयं गच्छन्ति।(बसयान-तृतीया एकवचन)

खण्डः- ‘ घ ’(पठित-अवबोधनम्)

7. **अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत-**

पुरा एकस्मिन् वृक्षे एका चटका प्रतिवसति स्म। कालेन तस्याः सन्ततिः जाता। एकदा कश्चित् प्रमत्तः गजः तस्य वृक्षस्य अधः आगत्य तस्य शाखां शुण्डेन अत्रोटयत्। चटकायाः नीडं भुवि अपतत्। तेन अण्डानि विशीर्णानि। अथ सा चटका व्यलपत्। तस्याः विलापं श्रुत्वा काष्ठकूटः नाम खगः दुःखेन ताम् अपृच्छत्-‘भद्रे ! किमर्थं विलपसि?’ इति।

I. एकपदेन उत्तरत- 1 x2=2

i. वृक्षे का प्रतिवसति स्म ?

ii. वृक्षस्य शाखां कः अत्रोटयत्?

II. पूर्णवाक्येन उत्तरत- 2x1=2

i. चटकायाः विलापं श्रुत्वा काष्ठकूटः नाम खगः किम् अपृच्छत्?

III. यथानिर्देशम् उत्तरत- 1 x2=2

i. शुण्डेन अत्र का विभक्तिः ?

(क) द्वितीया (ख) प्रथमा (ग) तृतीया (घ) किमपि नास्ति

ii. पुरा एकस्मिन् वृक्षे एका चटका प्रतिवसति अस्मिन् वाक्ये अव्ययपदं किम्?

(क) एकस्मिन् (ख) पुरा (ग) एका (घ) स्म

| | | |
|---|---|---|
| 8. | **अधोलिखितं श्लोकं पठित्वा प्रश्नान् उत्तरत-**<br>केयूराः न विभूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वला<br>न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजाः ।<br>वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते<br>क्षीयन्तेऽखिलभूषणानि सततं वाग्भूषणं भूषणम् ।।<br>I. एकपदेन उत्तरत-<br>i. के पुरुषम् न विभूषयन्ति?<br>ii. कानि क्षीयन्ते ?<br>II. पूर्णवाक्येन उत्तरत-<br>i. पुरुषं का समलङ्करोति ?<br>III. यथानिर्देशम् उत्तरत-<br>i. <u>वाक्</u> इति पदस्य समानार्थकपदं पद्यांशे किम्?<br>(क) भूषणम् (ख) वाणी (ग) संस्कृता (घ) किमपि नास्ति<br>ii. <u>संस्कृता वाणी</u> अत्र विशेषणपदं किम्?<br>(क) उभयम् (ख) वाणी (ग) संस्कृता (घ) किमपि नास्ति | <br><br><br><br><br>1 x2=2<br><br><br>2 x1=2<br><br>1 x2=2 |
| 9. | **अधोलिखितानां शब्दानां कृते मंजूषातः चित्वा संस्कृतपदम् लिखत-**<br>[ भूषणम् , क्षीयन्ते , वाणी , हारः ]<br>i. वचन -<br>ii. आभूषण -<br>iii. माला-<br>iv. नष्ट होना- | 1x4=4 |
| 10- | **अधोलिखितं श्लोकांशं मेलयत -**<br>i. उदिते सूर्ये - कमलं विकसति<br>ii. पक्षी कूजति - धरणी विहसति<br>iii. सरितः सलिले नवघासम् ।<br>iv. हरिणोऽयं खादति - सेलति नौका | 1x4=4 |